# श्रीमद् भागवत रसिक कुटुंब

## श्री शिव रुद्राष्टकम

नमामीशमीशान निर्वाणरूपं(म्),
विभुं(म्) व्यापकं(म्) ब्रह्मवेदस्वरूपम्
निजं(न्) निर्गुणं(न्) निर्विकल्पं(न्) निरीहं(ञ्) ,
चिदाकाशमाकाशवासं(म्) भजेऽहम् ॥ 1॥

निराकारमोङ्करमूलं(न्) तुरीयं(ङ्),
गिराज्ञानगोतीतमीशं(ङ्) गिरीशम्।
करालं(म्) महाकालकालं(ङ्) कृपालं(ङ्)
गुणागारसंसारपारं(न्) नतोऽहम् ॥ 2॥

तुषाराद्रिसंकाशगौरं(ङ्) गभिरं(म्),
मनोभूतकोटिप्रभा श्री शरीरम्।
स्फुरन्मौलिकल्लोलिनी चारुगङ्गा ,
लसद्भालबालेन्दु कण्ठे भुजङ्गा ॥ 3॥

चलत्कुण्डलं(म्) भ्रू सुनेत्रं(म्) विशालं(म्) ,
प्रसन्नाननं(न्) नीलकण्ठं(न्) दयालम्।
मृगाधीशचर्माम्बरं(म्) मुण्डमालं(म्) ,
प्रियं(म्) शङ्करं(म्) सर्वनाथं(म्) भजामि ॥ 4॥

प्रचण्डं(म्) प्रकृष्टं(म्) प्रगल्भं(म्) परेशम्,
अखण्डम् अजं(म्) भानुकोटिप्रकाशं(म्)।
त्र्यः(श्)शूलनिर्मूलनं(म्) शूलपाणिं(म्) ,
भजेऽहं(म्) भवानीपतिं(म्) भावगम्यम् ॥ 5॥

कलातीतकल्याण कल्पान्तकारी ,
सदा सज्जनानन्ददाता पुरारी।
चिदानन्दसन्दोह मोहापहारी ,
प्रसीद प्रसीद प्रभो मन्मथारी ॥ 6॥

न यावद् उमानाथपादारविन्दं(म्) ,
भजन्तीह लोके परे वा नराणाम्।
न तावत्सुखं(म्) शान्ति सन्तापनाशं(म्) ,
प्रसीद प्रभो सर्वभूताधिवासं(न्) ॥ 7॥

न जानामि योगं(ञ्) जपं(न्) नैव पूजां(न्) ,
नतोहं(म्) सदा सर्वदा शम्भुतुभ्यम् ।
जराजन्मदुः(ख्)खौघ तातप्यमानं(म्) ,
प्रभो पाहि आपन्नमामीश शंभो ॥ 8॥

रूद्राष्टकं इदं प्रोक्तं विप्रेण हर्षोतये
ये पठन्ति नरा भक्तयां तेषां शंभो प्रसीदति।।

॥ इति श्रीगोस्वामितुलसीदासकृतं श्रीरुद्राष्टकं सम्पूर्णम् ॥